**SET-4**

**Series %BAB%/C**

प्रश्न-पत्र कोड
Q.P. Code **49**

रोल नं.
Roll No.

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **9** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **9** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **9** printed pages.
- Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **9** questions.
- **Please write down the serial number of the question in the answer-book before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

*समयः : होराद्वयम्* | *पूर्णाङ्काः : 40*
*निर्धारित समय : 2 घण्टे* | *अधिकतम अंक : 40*
*Time allowed : 2 hours* | *Maximum Marks : 40*



collegedunia
India's largest Student Review Platform

*सामान्य निर्देशा :*

*अधः प्रदत्त निर्देशान् सावधानतया पठत अनुसरत च ।*

*(i)* *अस्मिन् प्रश्नपत्रे नव प्रश्नाः सन्ति ।*

*(ii)* *प्रश्नपत्रमिदं विषयवस्तुदृष्ट्या खण्डत्रयात्मकं वर्तते – अपठितावबोधनम्, रचनात्मककार्यम्, पठितावबोधनम् च ।*

*(iii)* *प्रथमखण्डे (अपठितावबोधनम्) प्रश्नस्य विषयवस्तुदृष्ट्या चत्वारः उपभागाः सन्ति । तेषु यथारुचि स्वेच्छया प्रश्नान् चित्वा यथानिर्देशम् उत्तरत ।*

*(iv)* *द्वितीयखण्डे (रचनात्मककार्यम्) चयनपूर्वकं त्रयः प्रश्नाः प्रदत्ताः सन्ति । विषयवस्तुदृष्ट्या यथेच्छं यथानिर्दिष्टं सर्वे प्रश्नाः समाधेयाः ।*

*(v)* *तृतीयखण्डे (पठितावबोधनम्) पाठ्यपुस्तकम् आधृत्य प्रश्नाः पृष्टाः सन्ति । अस्मिन् भागे प्रमुखरूपेण विषयवस्तुदृष्ट्या पञ्च प्रश्नाः सन्ति । सर्वे प्रश्नाः यथानिर्देशं समाधेयाः ।*

***Instructions :***

*(i)* *This question paper contains 9 questions.*

*(ii)* *This question paper contains **three** sections – Unseen passage, Writing skills and Textbook based questions.*

*(iii)* ***Section A** – Unseen passage contains four parts. Attempt all parts of questions based on specific instructions given in the question itself.*

*(iv)* ***Section B** – (Writing Skills) consists of three (3) questions. Attempt all 3 questions based on specific instructions given in the question itself.*

*(v)* ***Section C** – (Textbook based questions) contains 5 questions. Attempt all questions as per the instructions given in the question itself.*

## SECTION A

## अपठितावबोधनम्

## अपठित – अवबोधन

## Unseen Reading Comprehension

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following passage and answer the given questions in Sanskrit : *10*

अस्मिन् जगति को न जानाति महाकविं कालिदासम् । कालिदास: संस्कृतस्य उत्कृष्टतम: कवि: अस्ति । एतस्य यश: न केवलं भारते अपितु सम्पूर्णे विश्वे प्रसृतमस्ति । किंवदन्ती अस्ति यत् आरम्भे कालिदास: महामूर्ख: आसीत् । महाविदुष्या विद्योत्तमया सह



collegedunia
India's largest Student Review Platform

शास्त्रार्थे पराजितैः पण्डितैः कपटेन कालिदासस्य विवाहः एतया सह कारितः । पश्चात् विद्योत्तमा कालिदासस्य मूर्खतायाः विषये ज्ञात्वा तं गृहात् निष्कासितवती । अनेन अपमानेन दुःखितः कालिदासः ज्ञानप्रात्यर्थं दृढ़ं निश्चयम् अकरोत् । निरन्तराध्ययनेन भगवत्याः सरस्वत्याः कृपया च स विद्वान् अभवत् । ततः गृहमागत्य तेनोक्तम् — अनावृतं कपाटं द्वारं देहि । विद्योत्तमा तम् अपृच्छत् — अस्ति कश्चित् वाग्विशेषः । एतस्य वाक्यस्य त्रीणि पदानि स्वीकृत्य कालिदासः त्रीणि काव्यानि अरचयत् — कुमारसम्भवम्, मेघदूतम्, रघुवंशञ्चेति । कालिदासस्य कृतयः जगति प्रसिद्धाः सन्ति । 'अभिज्ञानशाकुन्तलम्' अस्यैव प्रसिद्धा नाटककृतिः अस्ति । धन्यः एषः कविकुलगुरुः कालिदासः ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) *2×1=2*

(i) कः संस्कृतस्य महाकविः अस्ति ?

(ii) आरम्भे कालिदासः कीदृशः आसीत् ?

(iii) कालिदासः कति काव्यानि अरचयत् ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×2=4*

(i) कालिदासः कथं विद्वान् अभवत् ?

(ii) कालिदासः पुनः गृहद्वारम् आगत्य किम् उक्तवान् ?

(iii) कालिदासस्य प्रसिद्धा नाटककृतिः का अस्ति ?

(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत ।
इस अनुच्छेद के लिए समुचित शीर्षक लिखिए ।
Write a suitable title for this passage. *1×1=1*

(ई) यथानिर्देशम् उत्तरत । (केवलं प्रश्नत्रयम्)
निर्देशानुसार उत्तर दीजिए । (केवल तीन प्रश्न)
Answer as directed. (Only three questions) *3×1=3*

(i) 'महाविदुष्या' इति विशेषणपदरूप विशेष्यपदं किम् ?

(ii) 'संसारे' इति पदस्य पर्यायं गद्यांशात् चित्वा लिखत ।

(iii) 'सम्मानेन' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत ।

(iv) 'अकरोत्' इति क्रियापदस्यं कर्तृपदं किम् ?



collegedunia.com India's largest Student Review Platform

## SECTION B

## रचनात्मककार्यम्

## रचनात्मक कार्य

## Creative Work

**2.** (क) 'सर्वे सन्तु निरामया:' इति लक्ष्यमधिकृत्य भवतां विद्यालयेन क्रीडाप्रतियोगितानाम् आयोजनं क्रियते । अधिकाधिका: छात्रा: आसु प्रतियोगितासु पञ्जीकरणं कारयन्तु इति विचिन्त्य एकां सूचनां संस्कृतेन लिखत । *1×5=5*

**अथवा**

(ख) भवतां विद्यालये नाटकप्रतियोगिता भविष्यति । अस्यां प्रतियोगितायाम् अधिकाधिका: छात्रा: भागं गृह्णीयु: इति उद्देश्येन एकम् आकर्षकं विज्ञापनं रचयत । *1×5=5*

**3.** प्रदत्ततथ्यानां सहायतया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत :

निम्नलिखित तथ्यों की सहायता से दिए गए विषय पर संस्कृत में अनुच्छेद लिखिए :

Write a paragraph on the given topic in Sanskrit with the help of the following facts : *1×5=5*

(क) **विषय: – प्रदूषणम्**

प्रदूषणस्य स्वरूपम्

प्रदूषणस्य कारणानि

प्रदूषणस्य समाधानोपायाः

उपसंहार:

**अथवा**

(ख) **विषय: – अनुशासनम्**

अनुशासनशब्दस्य अर्थ:

अनुशासनस्य आवश्यकता

अनुशासनेन लाभा:

उपसंहार:



collegedunia
India's largest Student Review Platform

**4.** निम्नलिखितवाक्येषु केषाञ्चन ***पञ्च*** वाक्यानां संस्कृतेन अनुवादं कुरुत :

निम्नलिखित वाक्यों में से किन्हीं पाँच वाक्यों का संस्कृत में अनुवाद कीजिए :

Translate any five sentences in Sanskrit of the following : *1×5=5*

(i) मनोज मित्रों के साथ बाग में घूमता है ।

Manoj walks in the garden with his friends.

(ii) वे सब पाठ याद करते हैं ।

They are learning lesson.

(iii) मुझे लड्डू पसन्द हैं ।

I like Laddoos.

(iv) मोहन भिखारी को अन्न देता है ।

Mohan gives grain to the beggar.

(v) उसने कलम से एक पत्र लिखा ।

He wrote a letter by pen.

(vi) गाँव के दोनों ओर पेड़ हैं ।

There are trees on the both sides of the village.

(vii) भारत विश्व में एक महान देश है ।

India is a greatest country in the world.

collegedunia.com India's largest Student Review Platform



collegedunia.com India's largest Student Review Platform

## SECTION C

## पठितावबोधनम्

## पठित – अवबोधन

## Reading Comprehension

**5.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following passage and answer the given questions in Sanskrit : *3*

मनुष्याणां हिंसावृत्तिस्तु निरवधिः । पशुहत्या तु तेषाम् आक्रीडनम् । केवलं विक्लान्तचित्तविनोदाय महारण्यम् उपगम्य ते यथेच्छं निर्दयं च पशुघातं कुर्वन्ति । तेषां पशुप्रहार-व्यापारमालोक्य जडानामपि अस्माकं विदीर्यते हृदयम् । निरन्तरम् आत्मोन्नत्यै चेष्टमानाः लोभाक्रान्त-हृदयाः मनुजन्मानः किल प्रतिक्षणं स्वार्थसाधनाय सर्वात्मना प्रवर्तन्ते । न धर्ममनुधावन्ति, न सत्यमनुबध्नन्ति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) मनुष्याणां का निरवधिः आस्ति ?

(ii) मनुष्याणां किम् आक्रीडनम् भवति ?

(iii) मनुष्याः कुत्र उपगम्य पशुघातं कुर्वन्ति ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in a complete sentence. (Only two questions) *2×1=2*

(i) विक्लान्तचित्तविनोदाय मनुष्याः किं कुर्वन्ति ?

(ii) किमालोक्य जडानामपि हृदयं विदीर्यते ?

(iii) कीदृशाः मानवाः प्रतिक्षणं स्वार्थसाधनाय सर्वात्मना प्रवर्तन्ते ?



collegedunia
India's largest Student Review Platform

**6.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following poetry and answer the given questions in Sanskrit : *3*

उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।

तटाकोदरसंस्थानां परीवाह इवाम्भसाम् ।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) केषां त्याग एव रक्षणम् भवति ?

(ii) तटाकोदरे केषां वास: भवति ?

(iii) केषाम् अभ्यासाम् परीवाह: भवति ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in a complete sentence. (Only two questions) $2\times1=2$

(i) कीदृशां वित्तानां त्याग एव रक्षणम् ?

(ii) अम्भसां रक्षणं कथं भवति ?

(iii) उपार्जितवित्तानां कथं रक्षणं भवति ?

**7.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following drama passage and answer the given questions in Sanskrit : *3*

*मनीष:* — अस्माभि: समाचारपत्रेषु पठितम् यत् विश्वेऽपि योगदिवस: सोत्साहं मान्यते ।

*योगाचार्य:* — साधूक्तम् । जूनमासस्य एकविंशतितम: दिवस: तु अन्ताराष्ट्रिययोगदिवसरूपेण सर्वत्र मान्यते ।

*मोहिनी* — आचार्य ! सम्प्रति वयं योगविषये सविस्तरं ज्ञातुम् इच्छाम: ।

(योगाचार्य: पाठमाध्यमेन योगशिक्षां शिक्षयति)

*योगाचार्य:* — प्रियच्छात्रा: ध्यानेन शृणुत । योगश्चित्तवृत्ति निरोधः ।



collegedunia India's largest Student Review Platform

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) योगाचार्यः कथं योगशिक्षां शिक्षयति ?

(ii) विश्वे सोत्साहम् किं मान्यते ?

(iii) कः योगविषये छात्रान् सविस्तरं शिक्षयति ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in a complete sentence. (Only two questions) $2\times1=2$

(i) छात्रैः समाचारपत्रेषु किं पठितम् ?

(ii) अन्ताराष्ट्रिययोगदिवसः कदा मान्यते ?

(iii) योगः कः ? लिखत ।

collegedunia.com
India's largest Student Review Platform

**8.** अधोलिखितभावार्थे रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत :

निम्नलिखित भावार्थ में रिक्तस्थान पूर्ति मञ्जूषा में दिए गए पदों की सहायता से कीजिए :

Fill in the blanks in the following explanations with the help of the words as given in the box : $3\times1=3$

(क) "कार्यं वा साधयेयम्, देहं वा पातयेयम्"

**भावार्थः**

इह जगति ये केऽपि जनाः वीराः (i) _________ दृढसंकल्पयुक्ताः भवन्ति ते (ii) _________ लक्ष्यं पूर्णं कर्तुं सदैव तत्पराः भवन्ति । कापि बाधा तान् रोद्धुं न शक्नोति । तेषां तु अयमेव सङ्कल्पः भवति – 'कार्यं सिद्धं करिष्यामि अथवा (iii) _________ त्यक्ष्यामि ।

**अथवा**



collegedunia.com
India's largest Student Review Platform

(ख) “योग: स्वास्थ्यकर:”

**भावार्थ:**

स्वस्थजीवनजीवनाय योग: अतीव महत्त्वपूर्ण: उपायो वर्तते । अत: अस्माकं कृते (i) _________ शरीरस्य मनस: च नियमनाय उपयोगिनी । छात्रा: अस्य अभ्यासेन (ii) _________ अपि एकाग्रतां वर्धयितुं सक्षमा: भवन्ति । एवं हि (iii) _________ अपि अस्योपयोग: वर्तते ।

**मञ्जूषा**

| |
|---|
| स्वाध्याये, कर्मठा:, योगशिक्षा, सङ्कल्पितम्, छात्रजीवने, देहम् । |

**9.** अधोलिखित – अन्वये रिक्तस्थानानि पूरयत : (केवलं पद्यमेकम्)

निम्नलिखित अन्वय में रिक्त स्थानों की पूर्ति कीजिए : (केवल एक पद्य)

Fill in the blanks in the following prose-order-renderings of the verse : (Only one) *3×1=3*

(क) गिरौ कलापी गगने पयोदो लक्षान्तरेऽर्कश्च जले च पद्मम् ।
इन्दुर्द्विलक्षे कुमुदस्य बन्धुर्यो यस्य मित्रं न हि तस्य दूरम् ।।

**अन्वय:**

य: यस्य मित्रम् (भवति) न हि तस्य (i) _________ (भवति) । (यथा) गिरौ कलापि गगने (ii) _________ लक्षान्तरे च अर्क: जले च पद्मम्, कुमुदस्य बन्धु: (iii) _________ द्विलक्षे विद्यते ।

**अथवा**

(ख) दातव्यं भोक्तव्यं धनविषये सञ्चयो न कर्त्तव्य: ।
पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये ।।

**अन्वय:**

धनविषये सञ्चय: न (i)_________ (धनं तु) दातव्यम्, भोक्तव्यम् (भवेत्) । इह पश्य (ii)_________ सञ्चितम् अर्थम् अन्ये (iii) _________ ।

**मञ्जूषा**

| |
|---|
| हरन्ति, पयोद:, दूरम्, कर्तव्य:, मधुकरीणाम्, इन्दु: । |



collegedunia.com
India's largest Student Review Platform